माणविशिष्टम्। परिमातव्यम्। परिमाणीयम्।
(यथा, रघुः। १। ३७।
"माभूदाश्रमपीड़ेति परिमेयपुरःसरौ।
अनुभावविशेषात्तु सेनापरिगताविव॥")

परिमोक्षः, पुं, (परितो मोक्षः परित्यागः।) मल-त्यागः। यथा, श्रीभागवते २। ६। १०।
"पायुर्यमस्य मित्रस्य परिमोक्षस्य नारद!।
हिंसाया निरृतेर्मृत्योर्निरयस्य गुदं स्मृतम्॥"
"परिमोक्षस्य मलत्यागस्य। पायुरिन्द्रियं गुदं स्थानम्। निरृतेरलक्ष्म्याः।" इति तट्टीकायां श्रीधरस्वामी॥ *॥ परित्राणम्। यथा, विष्णु-धर्म्मोत्तरे।
"सर्व्वाशुभानां परिमोक्षकारि
संपूजनं देववरस्य विष्णोः।"
इति तिथ्यादितत्त्वम्॥
(विमुक्तिः। यथा, महाभारते। १। २। १६०।
"कर्णस्य परिमोक्षोऽत्र कुण्डलाभ्यां पुरन्दरात्॥")

परिमोषी, [न्] त्रि, (परिमुष्णातीति। परि+मुष्+णिनिः।) परिमोषणशीलः। चौरः। (इति हेमचन्द्रः। ३। ४६॥)

परिरम्भः, पुं, (परिरभ्यते इति। परि+रभि+घञ्। "रभेरशब्लिटोः।" ७। १। ६३। इति नुम्।) आलिङ्गनम्। इत्यमरः। ३। २। ३०॥ (यथा, गीतगोविन्दे। ५। ७।
"ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं
भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति॥")

परिवत्सरः, पुं, वत्सरः। इति जटाधरः॥ वत्सर-विशेषः। यथा, मलमासतत्त्वे।
"शकाब्दात् पञ्चभिः शेषात् समाद्यादिषु वत्सराः।
सम्परीदानुपूर्व्वाश्च तथोदापूर्व्वका मताः॥"
"परिपूर्व्वे तथादानं यवानाञ्च द्विजोत्तमाः॥"
इति विष्णुधर्म्मोत्तरम्॥

परिवर्ज्जनं, क्ली, (परिवर्ज्यते, परित्यज्यते प्राणैर्येन। परि+वृज्+णिच्+ल्युट्।) मारणम्। इत्य-मरः। २।८।११४॥ (भावे ल्युट्।) परित्यागः। यथा, उद्भटः।
"गोप्यो न दोषो मथुराङ्गनानां
धूर्त्तस्य कृष्णस्य हि रीतिरेषा।
विपर्य्ययो येन कृतः स्वपित्रो-
स्तस्योपपत्नीपरिवर्ज्जनं किम्॥"
परिवर्ज्जनीया यथा, कौर्म्मे उपरिभागे १५ अः।
"एकशय्यासनं पंक्तिभाण्डपक्वान्नमिश्रणम्।
याजनाध्ययने योनिस्तथैव सहभोजनम्॥
सहाध्यायस्तु दशमः सहयाजनमेव च।
एकादश समुद्दिष्टा दोषाः साङ्कर्य्यसञ्ज्ञिताः॥
समीपे चाप्यवस्थानात् पापं संक्रमते नृणाम्।
तस्मात् सर्व्वप्रयत्नेन साङ्कर्य्यं परिवर्ज्जयेत्॥"
"यस्मिन्देशे न सम्मानो न प्रीतिर्न च बान्धवाः।
न च विद्यागमः कश्चित्तं देशं परिवर्ज्जयेत्॥"
इति चाणक्यम्॥
"ब्राह्मणं बालिशं क्षत्त्रमयोद्धारं विशं जड़म्।
शूद्रमक्षरसंयुक्तं दूरतः परिवर्ज्जयेत्॥
कुभार्य्याञ्च कुमित्रञ्च कुराजानं कुसौहृदम्।
कुबन्धुञ्च कुदेशञ्च दूरतः परिवर्ज्जयेत्॥"
इति गरुड़पुराणे ११३ अध्यायः॥
("यस्य वै भाषमाणस्य रुजत्यूर्द्ध्वमुरोऽभृशम्।
अन्नञ्च च्यवते भुक्तं स्थितञ्चापि न जीर्य्यति॥
बलञ्च हीयते यस्य तृष्णा चाभिप्रवर्द्धते।
जायते हृदि शूलञ्च तं भिषक् परिवर्ज्जयेत्॥"
इति चरकेणेन्द्रियस्थाने षष्ठेऽध्याय उक्तम्॥)

परिवर्त्तः, पुं, (परिवर्त्तनमिति। परि+वृत्+भावे घञ्।) विनिमयः। (यथा, रामायणे। २। १०५। २५।
"हृष्यन्त्यृतुमुखं दृष्ट्वा नवं नवमिवागतम्।
ऋतूनां परिवर्त्तेन प्राणिनां प्राणसंक्षयः॥")
कूर्म्मराजः। अपवर्त्तनम्। इति मेदिनी॥ युगान्तः। इति हेमचन्द्रः॥ ग्रन्थविच्छेदः। इति जटाधरः॥ मृत्युपुत्त्रस्य दुःसहस्यौरसेन कलिकन्यानिर्म्मार्ष्टिगर्भजाताष्टपुत्त्रान्तर्गततृतीय-पुत्त्रः। (यथा, मार्कण्डेये। ५१। २।
"अष्टौ कुमाराः कन्याश्च तथाष्टावतिभीषणाः।
दन्ताकृष्टिस्तथोक्तिश्च परिवर्त्तस्तथापरः॥"
तन्नामनिरुक्तिर्यथा तत्रैव १४ श्लोके।
"अन्यगर्भे परान् गर्भान् सदैव परिवर्त्तयन्।
रतिमाप्नोति वाक्यञ्च विवक्षोरन्यदेव यत्॥
परिवर्त्तकसंज्ञोऽयं तस्यापि सितसर्षपैः।
रक्षोघ्नमन्त्रजप्यैश्च रक्षां कुर्व्वीत तत्त्ववित्॥")
तस्य पुत्त्रयोः कर्म्मादि यथा,—
"परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विज!।
तौ तु वृक्षाद्रिपरिखाप्राकाराम्भोधिसंश्रयौ॥
गुर्व्विण्याः परिवर्त्तन्तौ कुरुतः पादपादिषु।
क्रोष्टुके! परिवर्त्तः स्याद्गर्भस्यान्योदरात्ततः॥
न वृक्षस्यैव नैवाद्रिं न प्राकारं पयोनिधिम्।
परिखां न समाक्रामेदबला गर्भधारिणी॥"
इति मार्कण्डेयपुराणे। ५१। ६२—६४॥

परिवर्त्तनं, क्ली, (परि+वृत्+ल्युट्।) परिवर्त्तः। तत्पर्य्यायः। परिदानम् २ विनिमयः ३ नैमेयः ४ व्यतिहारः ५ परावर्त्तः ६ वैमेयः ७ विमयः ८। इति हेमचन्द्रः॥ (यथा, रघुः। १९। १३।
"अङ्कमङ्कपरिवर्त्तनोचिते
तस्य निन्यतुरशून्यतामुभे।
वल्लकी च हृदयङ्गमस्वना
वल्गुवागपि च वामलोचना॥")

परिवर्त्तिका, स्त्री, मेढ्रजातक्षुद्ररोगविशेषः। तल्ल-क्षणमाह।
"मर्द्दनात् पीड़नाद्वापि तथैवाप्यभिघाततः।
मेढ्रचर्म्म यदा वायुर्भजते सर्व्वतश्चरन्॥
तदा वातोपसृष्टन्तु तच्चर्म्म परिवर्त्तते।
सवेदनं सदाहञ्च पाकञ्च व्रजति क्वचित्॥
मणेरधस्तात् कोषस्तु ग्रन्थिरूपेण लम्बते।
मारुतागन्तुसम्भूतां विन्द्यात्तां परिवर्त्तिकाम्।
सकण्डुः कठिना वापि सैव श्लेष्मसमन्विता॥"
अस्यां वातजायामपि पित्तानुबन्धो बोद्धव्यो दाहपाकभावात्। कोषः चर्म्मकोषः॥ *॥
अथ तस्याश्चिकित्सा।
"परिवृत्तं घृताभ्यक्तं सुस्विन्नमुपनाहयेत्।
त्रिरात्रं पञ्चरात्रं वा वातघ्नैः शाल्वणादिभिः॥
ततोऽभ्यज्य शनैश्चर्म्म पाटयेत् पीड़येन्मणिम्।
प्रविष्टे चर्म्मणि मणौ स्वेदयेदुपनाहयेत्॥
दद्याद्वातहरान् वस्तीन् स्निग्धान्यन्नानि भोजयेत्।"
इति भावप्रकाशः॥

परिवसथः, पुं, (परितो वसन्त्यत्र। परि+वस्+उपसर्गे वसेरिति अथच्।) ग्रामः। इति हेम-चन्द्रः ४। २७॥

परिवहः, पुं, (परि सर्व्वतोभावेन वहतीति। परि+वह्+अच्।) सप्तवाय्वन्तर्गतषष्ठवायुः। स तु सुवहवायोरुपरिस्थितः। (यथा, सिद्धान्त-शिरोमणौ।
"भूवायुरावह इह प्रवहस्तदूर्द्ध्वः
स्यादुद्वहस्तदनुसंवहसंज्ञकश्च।
अन्यस्ततोऽपि सुवहः परिपूर्व्वकोऽस्मात्
बाह्यः परावह इमे पवनाः प्रसिद्धाः॥")

परिवादः, पुं, (परिसर्व्वतो दोषोल्लेखेन वादः कथनम्। परि+वद्+भावे घञ्।) अपवादः। (यथा, महानिर्व्वाणतन्त्रे। १। ४२।
"नीचसंसर्गनिरताः परवित्तापहारकाः।
परनिन्दापरद्रोह-परिवादपराः खलाः॥")*॥
परि+वद्+णिच्+करणे घञ्।) वीणा-वादनवस्तु। इति मेदिनी॥

परिवादकः, त्रि, (परिवदतीति। परि+वद्+ण्वुल्।) परिवादकर्त्ता। इति व्याकरणम्॥

परिवादिनी, स्त्री, (परिवदति स्वरानिति। परि+वद्+"सुप्यजातौ णिनिस्ताच्छील्ये।" ३। २। ७८। इति णिनिः स्त्रियां ङीप्।) सप्ततन्त्री-युक्तवीणा। इत्यमरः॥ (यथा, माघे। ६। ६।
"कलतया वचसः परिवादिनी
स्वरजिता रजितावशमाययुः॥")
परिवादविशिष्टा च॥

परिवादी, [न्] त्रि, (परिवदतीति परिवदितुं शीलमस्य वा। परि+वद्+शीलार्थे कर्त्तरि णिनिः।) परिवादकर्त्ता। (यथा, महाभारते। ७। ७१। २६।
"साधूनसूयतां ये च ये चापि परिवादिनाम्॥"
परिवादो निन्दा विद्यतेऽस्य।) परिवाद-विशिष्टः। इति परिवादशब्दादस्त्यर्थे इनिः॥

परिवापः, पुं, (परिसर्व्वत उप्यते इति। परि+वप्+घञ्।) पर्य्युप्तिः। वपनम्। जलस्थानम्। परिच्छदः। इति मेदिनी। पे २५॥

परिवापनं, क्ली, (परि+वप्+णिच्+ल्युट्।) मुण्डनम्। इति हेमचन्द्रः॥

परिवापितं, त्रि, (परिवाप्यते स्म। परि+वप+णिच्+क्त।) मुण्डितम्। इत्यमरः। ३।१।८५॥

परिवारः, पुं, (परिव्रियतेऽनेन। परि+वृ+करणे घञ्।) परिजनः। (यथा, रघुः। ६। १०।
"मनुष्यवाह्यं चतुरस्रयान-
मध्यास्य कन्या परिवारशोभि।